# Shri Dhumavati Sahasranamastotram

# શ્રીધૂમાવતીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : dhUmAvatIsahasranAmastotra

File name : dhUmAvatIsahasranAmastotra.itx

Category : sahasranAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Transliterated by : Muktabodha.org

Proofread by : Muktabodha.org, DPD

Description-comments : From Shaktapramoda kAlyAdidashamahAvidyAtantrAtmakaH kumAryAdipaMchAyatanadev tantraishcha samalaMkRitaH; From Muktabodha Indological Research Institute www.muktabodha.org; Data-entered by the staff of Muktabodha under the direction of Mark S. G. Dyczkowski.; Reprint of edition published in 1892. Revision 0 february 9, 2009

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : October 2, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2025

*sanskritdocuments.org*

# શ્રીધૂમાવતીસહસ્રનામસ્તોત્રમ્

અથ ધૂમાવતીસહસ્રનામસ્તોત્રમ્

શ્રીભૈરવ્યુવાચ

ધૂમાવત્યા ધર્મરાત્ર્યાઃ કથયસ્વ મહેશ્વર ।
સહસ્રનામસ્તોત્રમ્મે સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧॥

શ્રીભૈરવ ઉવાચ

શ‍ૃણુ દેવિ મહામાયે પ્રિયે પ્રાણસ્વરૂપિણિ ।
સહસ્રનામસ્તોત્રમ્મે ભવશત્રુવિનાશમ્ ॥ ૨॥

ૐ અસ્ય શ્રીધૂમાવતીસહસ્રનામસ્તોત્રસ્ય પિપ્પલાદ ઋષિઃ
પઙ્ક્તિશ્છન્દો ધૂમાવતી દેવતા શત્રુવિનિગ્રહે પાઠે વિનિયોગઃ ॥

ધુમા ધૂમવતી ધૂમા ધૂમપાનપરાયણા ।
ધૌતા ધૌતગિરા ધામ્ની ધૂમેશ્વરનિવાસિની ॥ ૩॥

અનન્તાઽનન્તરૂપા ચ અકારાકારરૂપિણી ।
આદ્યા આનન્દદાનન્દા ઇકારા ઇન્દ્રરૂપિણી ॥ ૪॥

ધનધાન્યાર્ત્થવાણીદા યશોધર્મપ્રિયેષ્ટદા ।
ભાગ્યસૌભાગ્યભક્તિસ્થા ગૃહપર્વતવાસિની ॥ ૫॥

રામરાવણસુગ્રીવમોહદા હનુમત્પ્રિયા ।
વેદશાસ્ત્રપુરાણજ્ઞા જ્યોતિશ્છન્દઃસ્વરૂપિણી ॥ ૬॥

ચાતુર્યચારુરુચિરા રઞ્જનપ્રેમતોષદા ।
કમલાસનસુધાવક્ત્રા ચન્દ્રહાસા સ્મિતાનના ॥ ૭॥

ચતુરા ચારુકેશી ચ ચતુર્વર્ગપ્રદા મુદા ।
કલા કાલધરા ધીરા ધારિણી વસુનીરદા ॥ ૮॥

હીરા હીરકવર્ણાભા હરિણાયતલોચના ।
દમ્ભમોહક્રોધલોભસ્નેહદ્વેષહરા પરા ॥ ૯॥

નારદેવકરી રામા રામાનન્દમનોહરા ।
યોગભોગક્રોધલોભહરા હરનમસ્કૃતા ॥ ૧૦॥

દાનમાનજ્ઞાનમાન-પાનગાનસુખપ્રદા ।
ગજગોશ્વપદાગઞ્જા ભૂતિદા ભૂતનાશિની ॥ ૧૧॥

ભવભાવા તથા બાલા વરદા હરવલ્લભા ।
ભગભઙ્ગભયા માલા માલતી તાલનાહૃદા ॥ ૧૨॥

જાલવાલહાલકાલકપાલપ્રિયવાદિની ।
કરઞ્જશીલગુઞ્જાઢ્યા ચૂતાઙ્કુરનિવાસિની ॥ ૧૩॥

પનસસ્થા પાનસક્તા પનસેશકુટુમ્બિની ।
પાવની પાવનાધારા પૂર્ણા પૂર્ણમનોરથા ॥ ૧૪॥

પૂતા પૂતકલા પૌરા પુરાણસુરસુન્દરી ।
પરેશી પરદા પારા પરાત્મા પરમોહિની ॥ ૧૫॥

જગન્માયા જગત્કર્ત્રી જગત્કીર્ત્તિર્જગન્મયી ।
જનની જયિની જાયા જિતા જિનજયપ્રદા ॥ ૧૬॥

કીર્ત્તિર્જ્ઞાનધ્યાનમાનદાયિની દાનવેશ્વરી ।
કાવ્યવ્યાકરણજ્ઞાના પ્રજ્ઞાપ્રજ્ઞાનદાયિની ॥ ૧૭॥

વિજ્ઞાજ્ઞા વિજ્ઞજયદા વિજ્ઞા વિજ્ઞપ્રપૂજિતા ।
પરાવરેજ્યા વરદા પારદા શારદા દરા ॥ ૧૮॥

દારિણી દેવદૂતી ચ મદના મદનામદા ।
પરમજ્ઞાનગમ્યા ચ ષરેશી પરગા પરા ॥ ૧૯॥

યજ્ઞા યજ્ઞપ્રદા યજ્ઞજ્ઞાનકાર્યકરી શુભા ।
શોભિની શુભ્રમથિની નિશુમ્ભાસુરમર્દ્દિની ॥ ૨૦॥

શામ્ભવી શમ્ભુપત્ની ચ શમ્ભુજાયા શુભાનના ।
શાઙ્કરી શઙ્કરારાધ્યા સન્ધ્યા સન્ધ્યાસુધર્મિણી ॥ ૨૧॥

શત્રુઘ્ની શત્રુહા શત્રુપ્રદા શાત્રવનાશિની ।
શૈવી શિવલયા શૈલા શૈલરાજપ્રિયા સદા ॥ ૨૨॥

શર્વરી શવરી શમ્ભુઃ સુધાઢ્યા સૌધવાસિની ।
સગુણા ગુણરૂપા ચ ગૌરવી ભૈરવીરવા ॥ ૨૩॥

ગૌરાઙ્ગી ગૌરદેહા ચ ગૌરી ગુરુમતી ગુરુઃ ।
ગૌર્ગ્ગૌર્ગવ્યસ્વરૂપા ચ ગુણાનન્દસ્વરૂપિણી ॥ ૨૪॥

ગણેશગણદા ગુણ્યા ગુણા ગૌરવવાઞ્છિતા ।
ગણમાતા ગણારાધ્યા ગણકોટિવિનાશિની ॥ ૨૫॥

દુર્ગા દુર્જ્જનહન્ત્રી ચ દુર્જ્જનપ્રીતિદાયિની ।
સ્વર્ગાપવર્ગદા દાત્રી દીના દીનદયાવતી ॥ ૨૬॥

દુર્ન્નિરીક્ષ્યા દુરાદુઃસ્થા દૌઃસ્થભઞ્જનકારિણી ।
શ્વેતપાણ્ડુરકૃષ્ણાભા કાલદા કાલનાશિની ॥ ૨૭॥

કર્મનર્મકરી નર્મા ધર્માધર્મવિનાશિની ।
ગૌરી ગૌરવદા ગોદા ગણદા ગાયનપ્રિયા ॥ ૨૮॥

ગઙ્ગા ભાગીરથી ભઙ્ગા ભગા ભાગ્યવિવર્દ્ધિની ।
ભવાની ભવહન્ત્રી ચ ભૈરવી ભૈરવીસમા ॥ ૨૯॥

ભીમા ભીમરવા ભૈમી ભીમાનન્દપ્રદાયિની ।
શરણ્યા શરણા શમ્યા શશિની શઙ્ખનાશિની ॥ ૩૦॥

ગુણા ગુણકરી ગૌણી પ્રિયાપ્રીતિપ્રદાયિની ।
જનમોહનકર્ત્રી ચ જગદાનન્દદાયિની ॥ ૩૧॥

જિતા જાયા ચ વિજયા વિજયા જયદાયિની ।
કામા કાલી કરાલાસ્યા ખર્વા ખઞ્જા ખરા ગદા ॥ ૩૨॥

ગર્વા ગરુત્મતી ધર્મા ઘર્ગ્ઘરા ઘોરનાદિની ।
ચરાચરી ચરારાધ્યા છિના છિન્નમનોરથા ॥ ૩૩॥

છિન્નમસ્તા જયા જાપ્યા જગજ્જાયા ચ ઝર્ઝ્ઝરી ।
ઝકારા ઝીષ્કૃતિષ્ટીકા ટઙ્કા ટઙ્કારનાદિની ॥ ૩૪॥

ઠીકા ઠક્કુરઠક્કાઙ્ગી ઠઠઠાઙ્કારઢુણ્ઢુરા ।
ઢુણ્ઢીતારાજતીર્ણા ચ તાલસ્થાભ્રમનાશિની ॥ ૩૫॥

થકારા થકરા દાત્રી દીપા દીપવિનાશિની ।

ધન્યા ધના ધનવતી નર્મદા નર્મમોદિની ॥ ૩૬॥

પદ્મા પદ્માવતી પીતા સ્ફાન્તા ફૂત્કારકારિણી ।
ફુલ્લા બ્રહ્મમયી બ્રાહ્મી બ્રહ્માનન્દપ્રદાયિની ॥ ૩૭॥

ભવારાધ્યા ભવાધ્યક્ષા ભગાલી મન્દગામિની ।
મદિરા મદિરેક્ષા ચ યશોદા યમપૂજિતા ॥ ૩૮॥

યામ્યા રામ્યા રામરૂપા રમણી લલિતા લતા ।
લઙ્કેશ્વરી વાક્પ્રદા વાચ્યા સદાશ્રમવાસિની ॥ ૩૯॥

શ્રાન્તા શકારરૂપા ચ ષકારખરવાહના ।
સહ્યાદ્રિરૂપા સાનન્દા હરિણી હરિરૂપિણી ॥ ૪૦॥

હરારાધ્યા વાલવાચલવઙ્ગપ્રેમતોષિતા ।
ક્ષપા ક્ષયપ્રદા ક્ષીરા અકારાદિસ્વરૂપિણી ॥ ૪૧॥

કાલિકા કાલમૂર્ત્તિશ્ચ કલહા કલહપ્રિયા ।
શિવા શન્દાયિની સૌમ્યા શત્રુનિગ્રહકારિણી ॥ ૪૨॥

ભવાની ભવમૂર્ત્તિશ્ચ શર્વાણી સર્વમઙ્ગલા ।
શત્રુવિદ્દ્રાવિણી શૈવી શુમ્ભાસુરવિનાશિની ॥ ૪૩॥

ધકારમન્ત્રરૂપા ચ ધૂમ્બીજપરિતોષિતા ।
ધનાધ્યક્ષસ્તુતા ધીરા ધરારૂપા ધરાવતી ॥ ૪૪॥

ચર્વિણી ચન્દ્રપૂજ્યા ચ ચ્છન્દોરૂપા છટાવતી ।
છાયા છાયાવતી સ્વચ્છા છેદિની મેદિની ક્ષમા ॥ ૪૫॥

વલ્ગિની વર્દ્ધિની વન્દ્યા વેદમાતા બુધસ્તુતા ।
ધારા ધારાવતી ધન્યા ધર્મદાનપરાયણા ॥ ૪૬॥

ગર્વિણી ગુરુપૂજ્યા ચ જ્ઞાનદાત્રી ગુણાન્વિતા ।
ધર્મિણી ધર્મરૂપા ચ ઘણ્ટાનાદપરાયણા ॥ ૪૭॥

ઘણ્ટાનિનાદિની ઘૂર્ણા ઘૂર્ણિતા ઘોરરૂપિણી ।
કલિઘ્ની કલિદૂતી ચ કલિપૂજ્યા કલિપ્રિયા ॥ ૪૮॥

કાલનિર્ણાશિની કાલ્યા કાવ્યદા કાલરૂપિણી ।
વર્ષિણી વૃષ્ટિદા વૃષ્ટિર્મહાવૃષ્ટિનિવારિણી ॥ ૪૯॥

ઘાતિની ઘાટિની ઘોણ્ટા ઘાતકી ઘનરૂપિણી ।
ધૂમ્બીજા ધૂઞ્જપાનન્દા ધૂમ્બીજજપતોષિતા ॥ ૫૦॥

ધૂન્ધૂમ્બીજજપાસક્તા ધૂન્ધૂમ્બીજપરાયણા ।
ધૂઙ્કારહર્ષિણી ધૂમા ધનદા ધનગર્વિતા ॥ ૫૧॥

પદ્માવતી પદ્મમાલા પદ્મયોનિપ્રપૂજિતા ।
અપારા પૂરણી પૂર્ણા પૂર્ણિમાપરિવન્દિતા ॥ ૫૨॥

ફલદા ફલભોક્ત્રી ચ ફલિની ફલદાયિની ।
ફૂત્કારિણી ફલાવાપ્ત્રી ફલભોક્ત્રી ફલાન્વિતા ॥ ૫૩॥

વારિણી વરણપ્રીતા વારિપાથોધિપારગા ।
વિવર્ણા ધૂમ્રનયના ધૂમ્રાક્ષી ધૂમ્રરૂપિણી ॥ ૫૪॥

નીતિર્નીતિસ્વરૂપા ચ નીતિજ્ઞા નયકોવિદા ।
તારિણી તારરૂપા ચ તત્ત્વજ્ઞાનપરાયણા ॥ ૫૫॥

સ્થૂલા સ્થૂલાધરા સ્થાત્રી ઉત્તમસ્થાનવાસિની ।
સ્થૂલા પદ્મપદસ્થાના સ્થાનભ્રષ્ટા સ્થલસ્થિતા ॥ ૫૬॥

શોષિણી શોભિની શીતા શીતપાનીયપાયિની ।
શારિણી શાઙ્ખિની શુદ્ધા શઙ્ખાસુરવિનાશિની ॥ ૫૭॥

શર્વરી શર્વરીપૂજ્યા શર્વરીશપ્રપૂજિતા ।
શર્વરીજાગ્રિતા યોગ્યા યોગિની યોગિવન્દિતા ॥ ૫૮॥

યોગિનીગણસંસેવ્યા યોગિની યોગભાવિતા ।
યોગમાર્ગરતાયુક્તા યોગમાર્ગાનુસારિણી ॥ ૫૯॥

યોગભાવા યોગયુક્તા યામિનીપતિવન્દિતા ।
અયોગ્યા યોધિની યોદ્ધ્રી યુદ્ધકર્મવિશારદા ॥ ૬૦॥

યુદ્ધમાર્ગરતાનાન્તા યુદ્ધસ્થાનનિવાસિની ।
સિદ્ધા સિદ્ધેશ્વરી સિદ્ધિઃ સિદ્ધિગેહનિવાસિની ॥ ૬૧॥

સિદ્ધરીતિસ્સિદ્ધપ્રીતિઃ સિદ્ધા સિદ્ધાન્તકારિણી ।
સિદ્ધગમ્યા સિદ્ધપૂજ્યા સિદ્ધબન્ધ્યા સુસિદ્ધિદા ॥ ૬૨॥

સાધિની સાધનપ્રીતા સાધ્યા સાધનકારિણી ।
સાધનીયા સાધ્યસાધ્યા સાધ્યસઙ્ઘસુશોભિની ॥ ૬૩॥

સાધ્વી સાધુસ્વભાવા સા સાધુસન્તતિદાયિની ।
સાધુપૂજ્યા સાધુવન્દ્યા સાધુસન્દર્શનોદ્યતા ॥ ૬૪॥

સાધુદૃષ્ટા સાધુપૃષ્ઠા સાધુપોષણતત્પરા ।
સાત્ત્વિકી સત્ત્વસંસિદ્ધા સત્ત્વસેવ્યા સુખોદયા ॥ ૬૫॥

સત્ત્વવૃદ્ધિકરી શાન્તા સત્ત્વસંહર્ષમાનસા ।
સત્ત્વજ્ઞાના સત્ત્વવિદ્યા સત્ત્વસિદ્ધાન્તકારિણી ॥ ૬૬॥

સત્ત્વવૃદ્ધિસ્સત્ત્વસિદ્ધિસ્સત્ત્વસમ્પન્નમાનસા ।
ચારુરૂપા ચારુદેહા ચારુચઞ્ચલલોચના ॥ ૬૭॥

છદ્મિની છદ્મસઙ્કલ્પા છદ્મવાર્ત્તા ક્ષમાપ્રિયા ।
હઠિની હઠસમ્પ્રીતિર્હઠવાર્ત્તા હઠોદ્યમા ॥ ૬૮॥

હઠકાર્યા હઠધર્મા હઠકર્મપરાયણા ।
હઠસમ્ભોગનિરતા હઠાત્કારરતિપ્રિયા ॥ ૬૯॥

હઠસમ્ભેદિની હૃદ્યા હૃદ્યવાર્ત્તા હરિપ્રિયા ।
હરિણી હરિણીદૃષ્ટિર્હરિણીમાંસભક્ષણા ॥ ૭૦॥

હરિણાક્ષી હરિણપા હરિણીગણહર્ષદા ।
હરિણીગણસંહર્ત્રી હરિણીપરિપોષિકા ॥ ૭૧॥

હરિણીમૃગયાસક્તા હરિણીમાનપુરસ્સરા ।
દીના દીનાકૃતિર્દૂના દ્રાવિણી દ્રવિણપ્રદા ॥ ૭૨॥

દ્રવિણાચલસંવ્વાસા દ્રવિતા દ્રવ્યસંય્યુતા ।
દીર્ઘ્યા દીર્ઘપદા દૃશ્યા દર્શનીયા દૃઢાકૃતિઃ ॥ ૭૩॥

દૃઢા દ્વિષ્ટમતિર્દુષ્ટા દ્વેષિણી દ્વેષિભઞ્જિની ।
દોષિણી દોષસંય્યુક્તા દુષ્ટશત્રુવિનાશિની ॥ ૭૪॥

દેવતાર્ત્તિહરા દુષ્ટદૈત્યસઙ્ઘવિદારિણી ।
દુષ્ટદાનવહન્ત્રી ચ દુષ્ટદૈત્યનિષૂદિની ॥ ૭૫॥

દેવતાપ્રાણદા દેવી દેવદુર્ગતિનાશિની ।
નટનાયકસંસેવ્યા નર્ત્તકી નર્ત્તકપ્રિયા ॥ ૭૬॥

નાટ્યવિદ્યા નાટ્યકર્ત્રી નાદિની નાદકારિણી ।

નવીનનૂતના નવ્યા નવીનવસ્ત્રધારિણી ॥ ૭૭॥

નવ્યભૂષા નવ્યમાલ્યા નવ્યાલઙ્કારશોભિતા ।
નકારવાદિની નમ્યા નવભૂષણભૂષિતા ॥ ૭૮॥

નીચમાર્ગા નીચભૂમિર્નીચમાર્ગગતિર્ગતિઃ ।
નાથસેવ્યા નાથભક્તા નાથાનન્દપ્રદાયિની ॥ ૭૯॥

નમ્રા નમ્રગતિર્નેત્રી નિદાનવાક્યવાદિની ।
નારીમધ્યસ્થિતા નારી નારીમધ્યગતાઽનઘા ॥ ૮૦॥

નારીપ્રીતિ નરારાધ્યા નરનામપ્રકાશિની ।
રતી રતિપ્રિયા રમ્યા રતિપ્રેમા રતિપ્રદા ॥ ૮૧॥

રતિસ્થાનસ્થિતારાધ્યા રતિહર્ષપ્રદાયિની ।
રતિરૂપા રતિધ્યાના રતિરીતિસુધારિણી ॥ ૮૨॥

રતિરાસમહોલ્લાસા રતિરાસવિહારિણી ।
રતિકાન્તસ્તુતા રાશી રાશિરક્ષણકારિણી ॥ ૮૩॥

અરૂપા શુદ્ધરૂપા ચ સુરૂપા રૂપગર્વિતા ।
રૂપયૌવનસમ્પન્ના રૂપરાશી રમાવતી ॥ ૮૪॥

રોધિની રોષિણી રુષ્ટા રોષિરુદ્ધા રસપ્રદા ।
માદિની મદનપ્રીતા મધુમત્તા મધુપ્રદા ॥ ૮૫॥

મદ્યપા મદ્યપધ્યેયા મદ્યપપ્રાણરક્ષિણી ।
મદ્યપાનન્દસન્દાત્રી મદ્યપપ્રેમતોષિતા ॥ ૮૬॥

મદ્યપાનરતા મત્તા મદ્યપાનવિહારિણી ।
મદિરા મદિરારક્તા મદિરાપાનહર્ષિણી ॥ ૮૭॥

મદિરાપાનસન્તુષ્ટા મદિરાપાનમોહિની ।
મદિરામાનસામુગ્ધા માધ્વીપા મદિરાપ્રદા ॥ ૮૮॥

માધ્વીદાનસદાનન્દા માધ્વીપાનરતા મદા ।
મોદિની મોદસન્દાત્રી મુદિતા મોદમાનસા ॥ ૮૯॥

મોદકર્ત્રી મોદદાત્રી મોદમઙ્ગલકારિણી ।
મોદકાદાનસન્તુષ્ટા મોદકગ્રહણક્ષમા ॥ ૯૦॥

મોદકાલબ્ધિસઙ્ક્રુદ્ધા મોદકપ્રાપ્તિતોષિણી ।
માંસાદા માંસસમ્ભક્ષા માંસભક્ષણહર્ષિણી ॥ ૯૧॥

માંસપાકપરપ્રેમા માંસપાકાલયસ્થિતા ।
મત્સ્યમાંસકૃતાસ્વાદા મકારપઞ્ચકાન્વિતા ॥ ૯૨॥

મુદ્રા મુદ્રાન્વિતા માતા મહામોહા મનસ્વિની ।
મુદ્રિકા મુદ્રિકાયુક્તા મુદ્રિકાકૃતલક્ષણા ॥ ૯૩॥

મુદ્રિકાલઙ્કૃતા માદ્રી મન્દરાચલવાસિની ।
મન્દરાચલસંસેવ્યા મન્દરાચલવાસિની ॥ ૯૪॥

મન્દરધ્યેયપાદાબ્જા મન્દરારણ્યવાસિની ।
મન્દુરાવાસિની મન્દા મારિણી મારિકામિતા ॥ ૯૫॥

મહામારી મહામારીશમિની શવસંસ્થિતા ।
શવમાંસકૃતાહારા શ્મશાનાલયવાસિની ॥ ૯૬॥

શ્મશાનસિદ્ધિસંહૃષ્ટા શ્મશાનભવનસ્થિતા ।
શ્મશાનશયનાગારા શ્મશાનભસ્મલેપિતા ॥ ૯૭॥

શ્મશાનભસ્મભીમાઙ્ગી શ્મશાનાવાસકારિણી ।
શામિની શમનારાધ્યા શમનસ્તુતિવન્દિતા ॥ ૯૮॥

શમનાચારસન્તુષ્ટા શમનાગારવાસિની ।
શમનસ્વામિની શાન્તિઃ શાન્તસજ્જનપૂજિતા ॥ ૯૯॥

શાન્તપૂજાપરા શાન્તા શાન્તાગારપ્રભોજિની ।
શાન્તપૂજ્યા શાન્તવન્દ્યા શાન્તગ્રહસુધારિણી ॥ ૧૦૦॥

શાન્તરૂપા શાન્તિયુક્તા શાન્તચન્દ્રપ્રભાઽમલા ।
અમલા વિમલા મ્લાના માલતી કુઞ્જવાસિની ॥ ૧૦૧॥

માલતીપુષ્પસમ્પ્રીતા માલતીપુષ્પપૂજિતા ।
મહોગ્રા મહતી મધ્યા મધ્યદેશનિવાસિની ॥ ૧૦૨॥

મધ્યમધ્વનિસમ્પ્રીતા મધ્યમધ્વનિકારિણી ।
મધ્યમા મધ્યમપ્રીતિર્મધ્યમપ્રેમપૂરિતા ॥ ૧૦૩॥

મધ્યાઙ્ગચિત્રવસના મધ્યખિન્ના મહોદ્ધતા ।
મહેન્દ્રકૃતસમ્પૂજા મહેન્દ્રપરિવન્દિતા ॥ ૧૦૪॥

મહેન્દ્રજાલસંય્યુક્તા મહેન્દ્રજાલકારિણી ।
મહેન્દ્રમાનિતાઽમાના માનિનીગણમધ્યગા ॥ ૧૦૫॥

માનિનીમાનસમ્પ્રીતા માનવિધ્વંસકારિણી ।
માનિન્યાકર્ષિણી મુક્તિર્મુક્તિદાત્રી સુમુક્તિદા ॥ ૧૦૬॥

મુક્તિદ્વેષકરી મૂલ્યકારિણી મૂલ્યહારિણી ।
નિર્મલા મૂલસંય્યુક્તા મૂલિની મૂલમન્ત્રિણી ॥ ૧૦૭॥

મૂલમન્ત્રકૃતાર્હાદ્યા મૂલમન્ત્રાર્ગ્ઘ્યહર્ષિણી ।
મૂલમન્ત્રપ્રતિષ્ઠાત્રી મૂલમન્ત્રપ્રહર્ષિણી ॥ ૧૦૮॥

મૂલમન્ત્રપ્રસન્નાસ્યા મૂલમન્ત્રપ્રપૂજિતા ।
મૂલમન્ત્રપ્રણેત્રી ચ મૂલમન્ત્રકૃતાર્ચ્ચના ॥ ૧૦૯॥

મૂલમન્ત્રપ્રહૃષ્ટાત્મા મૂલવિદ્યા મલાપહા ।
વિદ્યાઽવિદ્યા વટસ્થા ચ વટવૃક્ષનિવાસિની ॥ ૧૧૦॥

વટવૃક્ષકૃતસ્થાના વટપૂજાપરાયણા ।
વટપૂજાપરિપ્રીતા વટદર્શનલાલસા ॥ ૧૧૧॥

વટપૂજા કૃતા હ્લાદા વટપૂજાવિવર્દ્ધિની ।
વશિની વિવશારાધ્યા વશીકરણમન્ત્રિણી ॥ ૧૧૨॥

વશીકરણસમ્પ્રીતા વશીકારકસિદ્ધિદા ।
બટુકા બટુકારાધ્યા બટુકાહારદાયિની ॥ ૧૧૩॥

બટુકાર્ચ્ચાપરા પૂજ્યા બટુકાર્ચ્ચાવિવર્દ્ધિની ।
બટુકાનન્દકર્ત્રી ચ બટુકપ્રાણરક્ષિણી ॥ ૧૧૪॥

બટુકેજ્યાપ્રદાઽપારા પારિણી પાર્વતીપ્રિયા ।
પર્વતાગ્રકૃતાવાસા પર્વતેન્દ્રપ્રપૂજિતા ॥ ૧૧૫॥

પાર્વતીપતિપૂજ્યા ચ પાર્વતીપતિહર્ષદા ।
પાર્વતીપતિબુદ્ધિસ્થા પાર્વતીપતિમોહિની ॥ ૧૧૬॥

પાર્વતીયદ્વિજારાધ્યા પર્વતસ્થા પ્રતારિણી ।
પદ્મલા પદ્મિની પદ્મા પદ્મમાલાવિભૂષિતા ॥ ૧૧૭॥

પદ્મજેડ્યપદા પદ્મમાલાલઙ્કૃતમસ્તકા ।

પદ્માર્ચ્ચિતપદદ્વન્દ્વા પદ્મહસ્તપયોધિજા ॥ ૧૧૮॥

પયોધિપારગન્ત્રી ચ પાથોધિપરિકીર્ત્તિતા ।
પાથોધિપારગાપૂતા પલ્વલામ્બુપ્રતર્પિતા ॥ ૧૧૯॥

પલ્વલાન્તઃ પયોમગ્ના પવમાનગતિર્ગતિઃ ।
પયઃ પાના પયોદાત્રી પાનીયપરિકાઙ્ક્ષિણી ॥ ૧૨૦॥

પયોજમાલાભરણા મુણ્ડમાલાવિભૂષણા ।
મુણ્ડિની મુણ્ડહન્ત્રી ચ મુણ્ડિતા મુણ્ડશોભિતા ॥ ૧૨૧॥

મણિભૂષા મણિગ્રીવા મણિમાલાવિરાજિતા ।
મહામોહા મહામર્ષા મહામાયા મહાહવા ॥ ૧૨૨॥

માનવી માનવીપૂજ્યા મનુવંશવિવર્દ્ધિની ।
મઠિની મઠસંહન્ત્રી મઠસમ્પત્તિહારિણી ॥ ૧૨૩॥

મહાક્રોધવતી મૂઢા મૂઢશત્રુવિનાશિની ।
પાઠીનભોજિની પૂર્ણા પૂર્ણહારવિહારિણી ॥ ૧૨૪॥

પ્રલયાનલતુલ્યાભા પ્રલયાનલરૂપિણી ।
પ્રલયાર્ણવસમ્મગ્ના પ્રલયાબ્ધિવિહારિણી ॥ ૧૨૫॥

મહાપ્રલયસમ્ભૂતા મહાપ્રલયકારિણી ।
મહાપ્રલયસમ્પ્રીતા મહાપ્રલયસાધિની ॥ ૧૨૬॥

મહામહાપ્રલયેજ્યા મહાપ્રલયમોદિની ।
છેદિની છિન્નમુણ્ડોગ્રા છિન્ના છિન્નરુહાર્થિની ॥ ૧૨૭॥

શત્રુસઞ્છેદિની છન્ના ક્ષોદિની ક્ષોદકારિણી ।
લક્ષિણી લક્ષસમ્પૂજ્યા લક્ષિતા લક્ષણાન્વિતા ॥ ૧૨૮॥

લક્ષશસ્ત્રસમાયુક્તા લક્ષબાણપ્રમોચિની ।
લક્ષપૂજાપરાઽલક્ષ્યા લક્ષકોદણ્ડખણ્ડિની ॥ ૧૨૯॥

લક્ષકોદણ્ડસંય્યુક્તા લક્ષકોદણ્ડધારિણી ।
લક્ષલીલાલયાલભ્યા લાક્ષાગારનિવાસિની ॥ ૧૩૦॥

લક્ષલોભપરા લોલા લક્ષભક્તપ્રપૂજિતા ।
લોકિની લોકસમ્પૂજ્યા લોકરક્ષણકારિણી ॥ ૧૩૧॥

લોકવન્દિતપાદાબ્જા લોકમોહનકારિણી ।
લલિતા લાલિતાલીના લોકસંહારકારિણી ॥ ૧૩૨॥

લોકલીલાકરી લોક્યાલોકસમ્ભવકારિણી ।
ભૂતશુદ્ધિકરી ભૂતરક્ષિણી ભૂતતોષિણી ॥ ૧૩૩॥

ભૂતવેતાલસંય્યુક્તા ભૂતસેનાસમાવૃતા ।
ભૂતપ્રેતપિશાચાદિસ્વામિની ભૂતપૂજિતા ॥ ૧૩૪॥

ડાકિની શાકિની ડેયા ડિણ્ડિમારાવકારિણી ।
ડમરૂવાદ્યસન્તુષ્ટા ડમરૂવાદ્યકારિણી ॥ ૧૩૫॥

હુઙ્કારકારિણી હોત્રી હાવિની હાવનાર્થિની ।
હાસિની હ્વાસિની હાસ્યહર્ષિણી હઠવાદિની ॥ ૧૩૬॥

અટ્ટાટ્ટહાસિની ટીકા ટીકાનિર્માણકારિણી ।
ટઙ્કિની ટઙ્કિતા ટઙ્કા ટઙ્કમાત્રસુવર્ણદા ॥ ૧૩૭॥

ટઙ્કારિણી ટકારાઢ્યા શત્રુત્રોટનકારિણી ।
ત્રુટિતા ત્રુટિરૂપા ચ ત્રુટિસન્દેહકારિણી ॥ ૧૩૮॥

તર્ષિણ તૃટ્પરિક્લાન્તા ક્ષુત્ક્ષામા ક્ષુત્પરિપ્લુતા ।
અક્ષિણી તક્ષિણી ભિક્ષાપ્રાર્થિની શત્રુભક્ષિણી ॥ ૧૩૯॥

કાઙ્ક્ષિણી કુટ્ટની ક્રૂરા કુટ્ટનીવેશ્મવાસિની ।
કુટ્ટનીકોટિસમ્પૂજ્યા કુટ્ટનીકુલમાર્ગિણી ॥ ૧૪૦॥

કુટ્ટનીકુલસંરક્ષા કુટ્ટનીકુલરક્ષિણી ।
કાલપાશાવૃતા કન્યા કુમારીપૂજનપ્રિયા ॥ ૧૪૧॥

કૌમુદી કૌમુદીહૃષ્ટા કરુણાદૃષ્ટિસંય્યુતા ।
કૌતુકાચારનિપુણા કૌતુકાગારવાસિની ॥ ૧૪૨॥

કાકપક્ષધરા કાકરક્ષિણી કાકસંવ્વૃતા ।
કાકાઙ્કરથસંસ્થાના કાકાઙ્કસ્યન્દનાસ્થિતા ॥ ૧૪૩॥

કાકિની કાકદૃષ્ટિશ્ચ કાકભક્ષણદાયિની ।
કાકમાતા કાકયોનિઃ કાકમણ્ડલમણ્ડિતા ॥ ૧૪૪॥

કાકદર્શનસંશીલા કાકસઙ્કીર્ણમન્દિરા ।
કાકધ્યાનસ્થદેહાદિધ્યાનગમ્યા ધમાવૃતા ॥ ૧૪૫॥

ધનિની ધનિસંસેવ્યા ધનચ્છેદનકારિણી ।
ધુન્ધુરા ધુન્ધુરાકારા ધૂમ્રલોચનઘાતિની ॥ ૧૪૬॥

ધૂઙ્કારિણી ચ ધૂમ્મન્ત્રપૂજિતા ધર્મનાશિની ।
ધૂમ્રવર્ણિની ધૂમ્રાક્ષી ધૂમ્રાક્ષાસુરઘાતિની ॥ ૧૪૭॥

ધૂમ્બીજજપસન્તુષ્ટા ધૂમ્બીજજપમાનસા ।
ધૂમ્બીજજપપૂજાર્હા ધૂમ્બીજજપકારિણી ॥ ૧૪૮॥

ધૂમ્બીજાકર્ષિતા ધૃષ્યા ધર્ષિણી ધૃષ્ટમાનસા ।
ધૂલીપ્રક્ષેપિણી ધૂલીવ્યાપ્તધમ્મિલ્લધારિણી ॥ ૧૪૯॥

ધૂમ્બીજજપમાલાઢ્યા ધૂમ્બીજનિન્દકાન્તકા ।
ધર્મવિદ્વેષિણી ધર્મરક્ષિણી ધર્મતોષિતા ॥ ૧૫૦॥

ધારાસ્તમ્ભકરી ધૂર્તા ધારાવારિવિલાસિની ।
ધાંધીંધૂંધૈમ્મન્ત્રવર્ણા ધૌંધઃસ્વાહાસ્વરૂપિણી ॥ ૧૫૧॥

ધરિત્રીપૂજિતા ધૂર્વા ધાન્યચ્છેદનકારિણી ।
ધિક્કારિણી સુધીપૂજ્યા ધામોદ્યાનનિવાસિની ॥ ૧૫૨॥

ધામોદ્યાનપયોદાત્રી ધામધૂલીપ્રધૂલિતા ।
મહાધ્વનિમતી ધૂપ્યા ધૂપામોદપ્રહર્ષિણી ॥ ૧૫૩॥

ધૂપાદાનમતિપ્રીતા ધૂપદાનવિનોદિની ।
ધીવરીગણસમ્પૂજ્યા ધીવરીવરદાયિની ॥ ૧૫૪॥

ધીવરીગણમધ્યસ્થા ધીવરીધામવાસિની ।
ધીવરીગણગોપ્ત્રી ચ ધીવરીગણતોષિતા ॥ ૧૫૫॥

ધીવરીધનદાત્રી ચ ધીવરીપ્રાણરક્ષિણી ।
ધાત્રીશા ધાતૃસમ્પૂજ્યા ધાત્રીવૃક્ષસમાશ્રયા ॥ ૧૫૬॥

ધાત્રીપૂજનકર્ત્રી ચ ધાત્રીરોપણકારિણી ।
ધૂમ્રપાનરતાસક્તા ધૂમ્રપાનરતેષ્ટદા ॥ ૧૫૭॥

ધૂમ્રપાનકરાનન્દા ધૂમ્રવર્ષણકારિણી ।
ધન્યશબ્દશ્રુતિપ્રીતા ધુન્ધુકારીજનચ્છિદા ॥ ૧૫૮॥

ધુન્ધુકારીષ્ટસન્દાત્રી થુન્ધુકારિસુમુક્તિદા ।

ધુન્ધુકાર્યારાધ્યરૂપા ધુન્ધુકારિમનસ્સ્થિતા ॥ ૧૫૯॥

ધુન્ધુકારિહિતાકાઙ્ક્ષા ધુન્ધુકારિહિતૈષિણી ।
ધિન્ધિમારાવિણી ધ્યાત્રી ધ્યાનગમ્યા ધનાર્થિની ॥ ૧૬૦॥

ધોરિણી ધોરણપ્રીતા ધારિણી ઘોરરૂપિણી ।
ધરિત્રીરક્ષિણી દેવી ધરાપ્રલયકારિણી ॥ ૧૬૧॥

ધરાધરસુતાઽશેષધારાધરસમદ્યુતિઃ ।
ધનાધ્યક્ષા ધનપ્રાપ્તિર્દ્ધનધાન્યવિવર્દ્ધિની ॥ ૧૬૨॥

ધનાકર્ષણકર્ત્રી ચ ધનાહરણકારિણી ।
ધનચ્છેદનકર્ત્રી ચ ધનહીના ધનપ્રિયા ॥ ૧૬૩॥

ધનસઁવ્વૃદ્ધિસમ્પન્ના ધનદાનપરાયણા ॥ ૧૬૪॥

ધનહૃષ્ટા ધનપુષ્ટા દાનાધ્યયનકારિણી ।
ધનરક્ષા ધનપ્રાણા ધનાનન્દકરી સદા ॥ ૧૬૫॥

શત્રુહન્ત્રી શવારૂઢા શત્રુસંહારકારિણી ।
શત્રુપક્ષક્ષતિપ્રીતા શત્રુપક્ષનિષૂદિની ॥ ૧૬૬॥

શત્રુગ્રીવાચ્છિદાછાયા શત્રુપદ્ધતિખણ્ડિની ।
શત્રુપ્રાણહરાહાર્યા શત્રૂન્મૂલનકારિણી ॥ ૧૬૭॥

શત્રુકાર્યવિહન્ત્રી ચ સાઙ્ગશત્રુવિનાશિની ।
સાઙ્ગશત્રુકુલચ્છેત્રી શત્રુસદ્મપ્રદાયિની ॥ ૧૬૮॥

સાઙ્ગસાયુધસર્વારિ-સર્વસમ્પત્તિનાશિની ।
સાઙ્ગસાયુધસર્વારિ-દેહગેહપ્રદાહિની ॥ ૧૬૯॥

ઇતીદન્ધૂમરૂપિણ્યાસ્સ્તોત્રન્નામ સહસ્રકમ્ ।
યઃ પઠેચ્છૂન્યભવને સધ્વાન્તે યતમાનસઃ ॥ ૧૭૦॥

મદિરામોદયુક્તો વૈ દેવીધ્યાનપરાયણઃ ।
તસ્ય શત્રુઃ ક્ષયં યાતિ યદિ શક્રસમોઽપિ વૈ ॥ ૧૭૧॥

ભવપાશહરમ્પુણ્યન્ધૂમાવત્યાઃ પ્રિયમ્મહત્ ।
સ્તોત્રં સહસ્રનામાખ્યમ્મમ વક્ત્રાદ્વિનિર્ગતમ્ ॥ ૧૭૨॥

પઠેદ્વા શ◌ૃણુયાદ્વાપિ શત્રુઘાતકરો ભવેત્ ।

ન દેયમ્પરશિષ્યાયાઽભક્તાય પ્રાણવલ્લભે ॥ ૧૭૩॥

દેયં શિષ્યાય ભક્તાય દેવીભક્તિપરાય ચ ।
ઇદં રહસ્યમ્પરમન્દુર્લ્લભન્દુષ્ટચેતસામ્ ॥ ૧૭૪॥

ઇતિ ધૂમાવતીસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

The original text is
from Muktabodha Indological Research Institute www.muktabodha.org
Data-entered by the staff of Muktabodha under the direction of Mark S. G.
Dyczkowski.
Reprint of edition published in 1892. Revision 0 february 9, 2009
Publisher : Shrivenkateshvara press Publication year : 1949

Reproofread by DPD

*Shri Dhumavati Sahasranamastotram*
pdf was typeset on March 3, 2025

Please send corrections to *sanskrit@cheerful.com*